# Nandikeshaproktam Shivanamamritam Mahimavarnanam

# નન્દિકેશપ્રોક્તં શિવનામામૃતમ્મહિમવર્ણનમ્

## Document Information

Text title : Nandikeshaproktam Shivanamamritam Mahimavarnanam

File name : shivanAmAmRRitammahimavarNanaMnandikeshaproktam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 42| 68-87 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# નન્દિકેશપ્રોક્તં શિવનામામૃતમ્મહિમવર્ણનમ્

હે વિશ્વેશ્વર હે મહેશ્વર મહાદેવેતિ નામામૃતં
પીત્વા પીનતનુસ્તનોતિ મુહુરપ્યાવર્તનં તસ્ય યઃ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧॥

હે કૈલાસનિવાસ હે પશુપતે પાહીતિ નામામૃતં
પીત્વા પીનતનુસ્તનોતિ મુહુરપ્યાવર્તનં તસ્ય યઃ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૨॥

હે ગૌરીકુચકુમ્ભિકુમ્ભવિલસત્કાશ્મીરધારારસ-
શ્રીપુઞ્જર્જિતપાદપદ્મ ભગવન્ પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૩॥

હે ગૌરીરમણારુણાચલપતે હે શઙ્કરારાધન-
વ્યાસક્તામરભૂરુહોત્તમતમ સ્વામિન્નિતીશાર્ચનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૪॥

હે શ્રીશૈલપતે મુહુઃ પશુપતે હે શૈલકન્યાપતે
હે કામાન્તક હે પુરાન્તક ઇતિ સ્મૃત્વૈવ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૫॥

હે કાશીપુરનાયકાશ્રિતશિવાચારવ્રતપ્રાપક-
વ્યાપારપ્રિયપાલકાવ ભગવન્નિત્યેવ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૬॥

શ્રીમન્મેરુશરાસનોરુશિખરસ્ફારપ્રભામણ્ડલ-
    વ્યાસક્તામલગણ્ડમણ્ડલતલ ત્રાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૭॥

હે મૃત્યુઞ્જય હે સદાશિવ શિવાવામાઙ્ગ શઙ્ગ પ્રભો
    હે શમ્ભો વૃષભધ્વજાતિદયયા પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૮॥

હે વિશ્વાધિક ભાલલોચન ચિરાસારોરુસંસારજા-
    પારક્લેશનિશાવિનાશ દયયા પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૯॥

શમ્ભો મે જનની ત્વમેવ જનકો ભ્રાતા સખા મિત્રમિ-
    ત્યાલસ્યેન વિના બદત્યનુદિનં ભક્ત્યાઽપિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૦॥

ભો ભર્ગ ત્રિપુરાન્તક ત્રિનયન શ્રીનીલકણ્ઠ પ્રભો
    શમ્ભો મારહરામરપ્રવર માં પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૧॥

ત્વત્પાદામ્બુરુહાર્ચનેન વિજયો ભાગ્યાનિ મે જીવનં
    જીવાતુશ્ચ તદેવ મે શિવ શિવ ત્રાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૨॥

પ્રાણિપ્રાણનકારણપ્રવણ માં પ્રાણપ્રયાણક્ષણે
    પ્રક્ષીણં શિવનામધેયસુધયા પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
    કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૩॥

સ્વામિન્નન્નપતે ધનાધિપપતે દુઃખાબ્ધિમગ્નં મુહુઃ

લગ્નં પાપગણેન ભગ્નમનસં પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૪॥

મામેકં શરણાગતં શરણદાનન્દપ્રદાનોદ્યત
સ્વાધીનં કુરુ લિઙ્ગપૂજનરતં પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૫॥

કાશ્યામેવ સિતત્રિપુણ્ડ્રનિટિલો રુદ્રાક્ષકણ્ઠો મુહુઃ
શ્રી વીરેશ્વરલિઙ્ગપૂજનરતં પાહીતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૬॥

રુદ્રાક્ષામિતભસ્મરૂષિતતનુઃ વિશ્વેશ્વરારાધનં
કૃત્વા શઙ્કર ચન્દ્રશેખર મહાદેવેતિ યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૭॥

કૃત્વા સોદકબિલ્વકોમલદલૈઃ વિશ્વેશ્વરારાધનં
જપ્ત્વા શઙ્કરનામ જીવનપરિત્યાગાય યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૮॥

શમ્ભોર્લિઙ્ગસમર્ચનોત્તરમયં ઘોરાન્તરાયૈર્વિના
દેહો યાતુ લયં મમેતિ મનસા નિશ્ચિત્ય યો નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૧૯॥

યો વૃન્દારકવૃન્દવન્દિતલસત્પાદારવિન્દાર્ચકં
દીનં મામવ શઙ્કર સ્મરહર વ્યાહારકૃન્નર્તનમ્ ।
કર્તું વાઞ્છતિ તત્પદામ્બુજરજઃપુઞ્જેન સઞ્જીવની-
કલ્પેનાસ્તુ શિરો વિભૂષિતમિતો ભીતિર્ન મૃત્યોરપિ ॥ ૨૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નન્દિકેશપ્રોક્તં શિવનામામૃતમ્મહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૨। ૬૮-૮૭ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 42. 68-87 ..

Proofread by Ruma Dewan

*Nandikeshaproktam Shivanamamritam Mahimavarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*